श्रीजगन्नाथ-ऐतिह्यस्य स्वरूपपर्य्यालोचनम्

- *प्रो. डॉ. मिनतिरथः*

शोधसारांशः -

श्रीनीलाचलनाथः परंब्रह्म-पुरुषोत्तमः श्रीजगन्नाथः यथा रहस्यमयी देवताऽस्ति तथैव रहस्याच्छन्नं तस्य ऐतिह्यमपि वर्तते। तस्य माहात्म्यप्रतिष्ठा मानवधारणायाः गवेषणायाश्च सुदूरातीताऽस्ति।

भारतीयवाङ्मयस्यानुशीलनेन वैदिकं पुरुषतत्वं पुरुषोत्तमजगन्नाथरूपेण सम्मुखमायाति। तन्त्रशास्त्रादारभ्य पुराणं यावत् सर्वत्र जगन्नाथतत्त्वं ऐतिह्यस्वरूपं चं स्पष्टतया प्रतिपादितम्। रुद्रयामल-तन्त्रमालादिषु ग्रन्थेषु च श्रीजगन्नाथस्य चर्चा विस्तरत: विद्यते । तन्त्रशास्त्रे जगन्नाथ: भैरवत्वेनाभिहित: ।

नैषधीयचरित-प्रबोधचन्द्रोदय-वेणीसंहार-अनर्घराघवादिषु च श्रीजगन्नाथ: पुरुषोत्तमत्वेन स्वीकृत:। कपिलसंहिता-शून्यसंहिता-वामदेवसंहितादिषु संहिताग्रन्थेषु नीलाद्रिमहोदयादिषु च ग्रन्थेषु जगन्नाथतत्त्वं ऐतिह्यस्वरूपं च भूरिश: प्रतिपादितम्। गरुड-कूर्म-मत्स्य-वामन-अग्नि-विष्णु-नीलमतपुराणेषु जगन्नाथतत्त्वं पुरुषोत्तमक्षेत्रयात्राफलञ्च संक्षिप्तरूपेण प्रकाशितमस्ति। ब्रह्म-पद्म-स्कन्द-नारदीय-कपिलादिषु पुराणेषु जगन्नाथतत्त्वं पूर्णतया निरूपितम्। इत्थं भारतीयवाङ्मये पुरुषोत्तमजगन्नाथस्य ऐतिह्यस्वरूपं तत्त्वञ्च स्पष्टतया समुपलभ्यते।

१.पृष्ठभूमिः-

व्येति संसारदुःखानि ददाति सुखमव्ययम्।
तस्माद्दारूमयं ब्रह्म वेदान्ते परिगीयते।।

विश्वसंस्कृतौ युगे युगे भारतीयविचारधारायाः स्थानं स्वतन्त्रमस्ति। भारतीयधार्मिके ऐतिह्ये सत्यस्य गभीरः परिप्रकाशः दृश्यते। भारतीयसांस्कृतिकपुष्पोद्याने विकशितानि विविध-धर्म-सम्प्रदायदर्शनानि च पुष्पसदृशानि समादरणीयानि शोभितानि च सन्ति। तत्र जगन्नाथधर्मः एकः महाकर्षणीयः सुरभितः पुष्पविशेषोऽस्ति यस्य सौरभेण भारतीयाः वैदेशिकाश्च धार्मिकाजनाः गवेषकाश्च समाकर्षिताः भवन्ति। जगन्नाथधर्मस्य गूढं रहस्यं भेदयितुं ते निरन्तरं प्रयतमानाः सन्ति।

श्रीनीलाचलनाथः परंब्रह्म-पुरुषोत्तमः श्रीजगन्नाथः यथा रहस्यमयी देवताऽस्ति तथैव रहस्याच्छन्नं तस्य ऐतिह्यमपि वर्तते। तस्य माहात्म्यप्रतिष्ठा मानवधारणायाः गवेषणायाश्च सुदूरातीताऽस्ति। श्रीजगन्नाथस्य स्वरूपाकारमन्दिरनिर्माणादिषु विषयेषु तथ्यमुद्घाटयितुं विद्वांसः ऐतिहासिकप्रमाणमवलम्ब्य नानाविधप्रयासं कुर्वन्ति। जगन्नाथस्य ऐतिह्यज्ञानाय तेषामैतिहासिकानां विदुषाञ्च गवेषणाजातं तथ्यमवलम्ब्य तथा च वेद-पुराण-तन्त्र-ज्योतिष-काव्यादीनां शास्त्राणां शास्त्रीयप्रमाणपुरःसरं पर्य्यालोचनमवश्यं कर्त्तव्यमस्ति इति धिया प्राथम्येन ऐतिहसिकं गवेषणाजातं तथ्यं मयोपस्थाप्यते।

२. ऐतिहासिकपृष्ठभूमिः

जगन्नाथं स्वीकृत्य प्रतिष्ठितः धर्मः जगन्नाथधर्मः प्रतिष्ठिता च संस्कृतिः जगन्नाथसंस्कृतिः। जगन्नाथस्य ऐतिह्यं शावर-जैन-बौद्ध-तान्त्रिक-वैष्णव-गाणपत्य-प्रभृतीनां संस्कृतीनां योगदानेन समृद्धमस्ति। जगन्नाथस्य-ऐतिह्यनिरूपणे तासां संस्कृतीनां जगन्नाथ-धर्मस्योपरि प्रभावोऽत्र आलोचनीयः।

ऐतिहासिकानां प्रमाणानुसारेण आधुनिकउत्कलप्रदेशः प्राचीनकालेउत्कल (उड्रः) –कलिङ्ग-कोशलश्चेति त्रिधा विभक्तः आसीत् । राष्ट्रस्य सुरक्षायै तदा राष्ट्रदेवताः कल्पिताः अभवन्। उत्कलदेशस्य राष्ट्रदेवः श्रीपुरुषोत्तमः जगन्नाथः कलिङ्गदेशस्य गोकर्णेश्वरः तथा च कोशलदेशस्य राष्ट्रदेवता आसीत्

स्तम्भेश्वरी। कालक्रमेण यदा उत्कल-कलिङ्ग-कोशलदेशानां सम्मिश्रणं जातं तदा तेषां राष्ट्रदेवताः अपि जगन्नाथ-बलभद्र-सुभद्रारूपेण एकत्र पूजिताः अभवन्।

३. सांस्कृतिकपृष्ठभूमिः-

ऐतिहासिककालात् प्रागेव उत्कलेषु शावर-सभ्यता विस्तृताऽऽसीत्। जगन्नाथस्य ऐतिह्ये समाविष्टानां संस्कृतीनां मध्ये शावरसंस्कृतिः सुप्रसिद्धाऽस्ति। अतः केचन ऐतिहासिकाः गवेषकाश्च जगन्नाथसंस्कृतिः शावरसंस्कृतेः विकशितरूपमिति निरूपयन्ति। तेषां मतानुसारेण प्रागैतिहासिकसमाजे आष्ट्रिक् सम्प्रदायः 'निषाद' इति प्रसिद्धः आसीत् । निषादानां शावराणां च संस्कृतिः शावरसंस्कृतिरिति कथिता।

(i) शावरसंस्कृतिः-

शावरसम्प्रदाये वृक्षपूजायाः प्रचलनमासीत्। प्राक्काले शवराः 'जगन्त' नाम्ना प्रसिद्धमेकं वृक्षं पूजयन्ति स्म। यस्मिन् उद्याने जगन्तवृक्षाः प्रादुर्भवन्ति तस्मिन् उद्याने शवराः वृक्षाणां च्छेदनं कदाचिदपि न कुर्वन्ति। शवराणां जगन्तवृक्षपूजनमेव दारुब्रह्मणः जगन्नाथस्य उपासनायाः प्राग्रूपमिति कल्पयित्वा पाश्चात्यगवेषकाः विल्किन्समहोदयाः श्रीजगन्नाथः आदिवासिगोष्ठीपूजितः देव आसीदिति स्वमतं परिपालयन्ति।

आदिमकालात् श्रीजगन्नाथः शवरपूजितदेवतात्वेन प्रसिद्धः आसीदिति मतं प्रायशो गवेषकाः ऐतिहासिकाश्च स्वीकुर्वन्ति। तेषु गुरुदाससरकार[१] प्रभातमुखार्जी[२] केदारनाथमहापात्र[३] वंशीधरमहान्ति[४] – नवीनकुमारसाहु[५] -पण्डितनीलकण्ठदाश[६] -प्रभृतयः प्रमुखाः सन्ति। उत्कलीयसंस्कृतविद्वांसः ड़ॉ. वेणीमाधव पाढीमहोदयाः जगन्नाथचेतनायाः – विकाशोपरि अवलम्बिते स्वशोधग्रन्थे जगन्नाथशब्दः न संस्कृतमूलकः नापि पालिमूलकः अपितु शावरमूलक[७] इति प्रतिपादयन्ति। आलोचनामाध्यमेन ज्ञातुं शक्यते यत्, अस्माभिः देवता इति यः शब्दः संस्कृते व्यवह्रीयते शावरभाषायां स एव 'कितुङ्ग' इति कथितः । शावरसंस्कृतौ स च कितुङ्गः दशविधरूपधारी। ते भ्रातरः यथा –जगन्त-तोड-तुमुन्-भीम-रंरं-गर्सिद्-रामन्-योजेपल्-मत-तितिश्तेति। तेषु जगन्तथभ्रातृषु जगन्तः अथवा जगनाईलो सर्वश्रेष्ठ सृष्टकारी देवः इति ख्यातः। गवेषकाः काह्नुचरणमिश्रपादाः[९] स्वगवेषणाप्रबन्धे 'जगनाईलो'[८] शब्दस्यार्थ दारुदेवता इति प्रस्तुवन्ति।

वैदिककाले च वृक्षपूजायाः प्रचलनं समाजे आसीत्। यजुर्वेदे रुद्रस्तुतौ 'नमो वृक्षेभ्यो' इति स्तुतिः विहिताऽस्ति । वायुपुराणे सृष्टिप्रकरणे च यज्ञीयवृक्षरूपेण पूजितानां वृक्षाणां नामानि प्रदत्तानि। तानि यथा कल्पवट-वाञ्छावट-इत्यादीनि। अधिककालजीवनावधित्वात् वृक्षादयः ईश्वरत्वेन तदानीन्तनकाले पूजितोऽभूत् । अतः शवरैः समुपासितः जगन्तवृक्षः कालान्तरे 'जगावोइ' जातः । जगावोइ शब्दस्यार्थः जगादेवता। इदानीन्तनसमाजे सभ्याः उत्कलीयाः अपि श्रद्धया जगन्नाथं 'जगाठाकुर' अथवा जगादेवता[१०] इति सम्बोधयन्ति। शवरसंस्कृत्यनुसारेण साम्प्रतमपि ते जगन्नाथपुर्य्याः समीपे एव निवसन्तीति गवेषकाः वासुदेवसाहुमहोदयौः[११] प्रमाणयन्ति। तद् यद्वा भवतु जगन्नाथसंस्कृतौ इदानीमपि शावरसभ्यतायाः प्रभावः परिलक्ष्यते। जगन्नाथस्य पूजनपरम्परायां विश्वावसुकुलोद्भवानां शवराणां कृते स्वतन्त्रसेवाविधानं[१२] कल्पितमस्ति।

(ii) जैनसंस्कृतिः

उत्कलीयपण्डितः[१३] नीलकण्ठदाशमहोदयानां मतानुसारेण तथा च अभिधानराजेन्द्रमतानुसारेण[१४] जगन्नाथशब्दः जैनशब्दस्य रूपान्तरविशेषः । यथा जैनधर्मस्यादि-प्रचारकः ऋषभनाथः सूर्यनाथेन रूपान्तरितोभूत् तथा च जगन्नाथशब्दः जीननाथात् समागतोऽभूदिति ग्रन्थप्रवेशानुसारेण[१५] कल्पितोऽस्ति । जैनसंस्कृतौ आषाढशुक्लद्वितीया- तिथिः प्रथमजैवतीर्थङ्करस्य गर्भकल्याणदिवसत्वेन परिपाल्यते। तस्मिन् दिनेऽपि जगन्नाथस्य रथयात्रा अनुष्ठिता भवति। पुनश्च रथयात्रायाः प्रागेव जैनसंस्कृतौ स्नानयात्रा

अभिषेकादयः विविधाः उत्सवाः जैनैः परिपाल्यते। तथैव तदुनसारेण रथयात्रायाः प्रागेव जगन्नाथस्य स्नानयात्रा प्रचलिता अस्ति। अपि च ऋषभदेवस्य यथा कैवल्यवृक्षः प्रसिद्धः श्रीजगन्नाथदेवस्यापि तथैव कल्पवृक्षः प्रसिद्धो विद्यते। उभयोरपि चिह्नं चक्रम्। जगन्नाथस्य मन्दिरोपरि विराजितं नीलचक्रं जैनसंस्कृतेः परिचायकमिति विद्वांसः प्रतिपादयन्ति। जैनधर्मस्य सकलतत्त्वाधारकं मोक्षदायकं त्रिरत्नं सम्यक्-दर्शनं सम्यक् ज्ञानं सम्यक् चरित्रं चेति कल्पितम्। ऐतिहासिककेदारनाथमहापात्रः श्रीजगन्नाथत्रिमूर्त्तितत्त्वेन साकं जैनत्रिरत्नतत्त्वं समानमिति स्वमतमुत्थापयन्ति। मगधनरपतिना महापद्मनन्देन यत् कलिङ्गजीनासनमपहृतं श्रीखारवेलेन तत् पुनरानीतमिति इतिहासात् ज्ञायते। कलिङ्गनरपतिना खारवेलेनानीतं तद् जीनासनं जगन्नाथीयचेतनायाः मूलमिति ऐतिहासिकाः चिन्तयन्ति।

(iii) बौद्धसंस्कृतिः-

बौद्धधर्मस्य प्रभावात् बहवः भारतीयाः बौद्धधर्मेण दीक्षिताः अभवन्। अशोकमहाराजस्य शासनकाले उत्कलीयाः शवराः बौद्धधर्मेण दीक्षिताः अभवन्। तदा पुरुषोत्तमक्षेत्रे बौद्धस्तूपाः निर्मिताः अभवन्। ते एव बौद्धस्तूपाः सरलप्राणानां शवराणां कृते प्रधानपूजापीठरूपेण गृहीताः। तदवसरे शवराः त्रिरत्नं त्रिमूर्त्तितत्त्वमत्वा पूजितवन्तः । यद्यपि प्राथमिकावस्थायां शवराः दारुपूजकाः आसन् तथापि बौद्धधर्मस्य त्रिरत्नतत्व-प्रभावात् ते जगन्नाथ-बलभद्र-सुभद्रारूपेण त्रिमूर्तितत्त्वं पूजितवन्तः इति डॉ. हरेकृष्णमहतावमहोदयाः स्व ओडिशाइतिहासग्रन्थे प्रतिपादयन्ति।

तथा च बौद्धधर्मस्य प्रभावात् तदा श्रीजगन्नाथस्य दारुदेहाभ्यन्तरे बुद्धदन्तस्य स्थापनं तथा च पुरुषोत्तमपीठमपि 'दन्तपुर' मिति नामकरणं तदैव जातमिति ऐतिहासिकाः निरूपयन्ति। तस्मिन्नेव दन्तपुरे बुद्ध-धर्म-संघनाम्ना त्रिरत्नतत्त्वं जगन्नाथ-बलभद्र-सुभद्रारूपेण त्रिमूर्त्तितत्त्वेन रूपान्तरितं जातं तथा च जातिधर्मवर्णनिर्विशेषेण सर्वसाधारणैः आराधितश्चाभूवन्।

ऐतिहासिकराजेन्द्रलालमित्रमहोदयाः[१६] श्रीजगन्नाथसंस्कृतौ परिपालितानि सर्वाणि पर्वाणि बौद्धसंस्कृतितः आगतानीति कथयन्ति। हुण्डेमहोदयाः[१७] जगन्नाथस्य रथयात्रा बुद्धदेवस्य जन्मोत्सव इति कल्पयन्ति।

गीतगोविन्दे दशावतारस्तोत्रे च श्रीजयदेवगोस्वामीना श्रीजगन्नाथदेवे बुद्धत्वमारोपितम्।

तद्यथा- **निन्दसि यज्ञविधेरहहः श्रुतिजातम्।**
सदयहृदयदर्शितपशुघातम्।
केशव धृत बुद्धशरीर जय जय देव हरे।

सारलादासकृते महाभारते च जगन्नाथः बौद्धरूपः प्रतिपादितः[१८] । परन्तु डॉ. गोपीनाथमहापात्र[१९] प्रभातमुखार्जी[२०] प्रभृतयः विद्वांसः जगन्नाथसंस्कृतिः बौद्धसंस्कृतेः विकशितरूपमिति मतं सर्वथा अयौक्तिकमिति प्रतिपादयन्ति । अतः जगन्नाथसंस्कृतिः बौद्ध-जैनसंस्कृतिभ्यां नैव प्रभाविता इति निरूपयितुं शक्यते। यतः श्रीमन्दिरे अनुसृते पूजाविधाने अनयोः धर्मयोः कोऽपि प्रभावः नैव परिलक्ष्यते।

(iv) तान्त्रिकसंस्कृतिः-

बौद्धधर्मस्य पतनानन्तरमुत्कले तन्त्रवादस्याभ्युदयः जातः। ख्रीष्टीयसप्तमे शतके महायान इव बौद्धिकतन्त्रशास्त्रस्य विकाशोऽभूत् । अष्टमशतके इन्द्रभूतिः तन्त्रयानं शुद्धं कृत्वा बज्रायानरूपेण विकशितं चकार। तदा उत्कले उड्डीयानपीठः श्रेष्ठतन्त्रपीठरूपेण ख्यातोऽभूत्। इन्द्रभूतिना प्रवर्तितं वज्रायानं तस्य सहोदरया लक्ष्मीङ्करया सहजयानेन परिणतो भूत्वा अनन्तरं शून्यदर्शनमाश्रित्य उत्कलीयजनतायाः उपास्यदेवे श्रीजगन्नाथे लीनोऽभूत् । ततः प्रभृतिः वज्रायानिनः जगन्नाथं शून्यस्य प्रतीकरूपेण चिन्तयन्ति स्म। अतः इन्द्रभूतिना स्वज्ञानसिद्धिग्रन्थे जगन्नाथस्य महदुत्कर्षः प्रतिपादितः।

(v) शाक्तसंस्कृतिः –

बौद्धधर्म इव ब्रह्मण्यधर्मस्य शैव-शाक्त-वैष्णवप्रभृतिषु तन्त्रस्य प्रभावः परिलक्ष्यते। यद्यपि तन्त्रशास्त्रे बहुसंस्कृतीनाम् एकत्र समावेशः दृश्यते तथापि तत्र शाक्तसंस्कृतेः प्रभावः सर्वाधिकः। शाक्तमतप्रतिपादके

कालिकापुराणे उल्लिखितं यत् दक्षयज्ञे भतृनिन्दां श्रुत्वा सती यज्ञाग्नौ शरीरं त्यक्तवती। विनष्टभूतं सत्याः शरीरं स्कन्धे वहन् शिवः उन्मत्तवत् बभ्राम। यत्र यत्र सत्याः शरीरं निपतितं बभूव तत्र तत्र तन्त्रपीठं जातम्।

तेषु तन्त्रपीठेषु चत्वारः मुख्याः तन्त्रपीठाः सन्ति येषु उड्रः अन्यतमः । श्यामार्चनतरङ्गे[२१] विमलाकल्पेऽपि[२२] च ओड्रस्थाने उड्डीयानस्य उल्लेखः प्राप्यते । यद्वा भवतु उदीयान-उड्डीयान-उड्र-ओड्र वा उत्कलस्य प्राचीनानि नामानि सन्ति इति प्राचीनतत्त्वविद्भिः बहुलतया प्रमाणितानि। कालिकापुराणानुसारेण श्रीक्षेत्रस्य पीठाधीश्वरी देवी विमला भैरवी अस्ति । तथा च जगन्नाथः भैरवोऽस्ति। श्रीमद्देवीभागवते[२३] तथैवोक्तम् । बहुप्राचीनकालादुत्कले शाक्तोपासनायाः प्रचलनं शाक्तपुराणैः ज्ञायते। उत्कलदेशस्य विरजापीठः शाक्तसंस्कृतेः राजधानी आसीत्। वराहमिहिरस्य. बृहत्संहितानुसारेण कृष्ण-बलभद्रयोः मध्ये एकानंशायाः जगन्नाथसंस्कृतौ सुभद्रारूपेणाविर्भावः शाक्तधर्मस्य जगन्नाथधर्मेण साकं समन्वयस्य प्रतीकः।

तत् यद्वा भवतु जगन्नाथसंस्कृतौ शाक्तसंस्कृतेः प्रभावः परिलक्ष्यते । शाक्तधर्मस्य प्राधान्यात् श्रीमन्दिरे यावत् पर्यन्तं जगन्नाथस्य प्रसादं विमलायै समर्पितं न भवति तावत् पर्यन्तं 'महाप्रसाद' इति पदवाच्यं न भवति। शाक्तमतानुसारेण जगन्नाथः भैरवः अभिहितः तथा च देवीविमला भैरवी अभि्राहिता।

(vi) शैवसंस्कृतिः –

तन्त्रशास्त्रस्य मुख्योपास्यदेवस्य श्रीजगन्नाथस्य संस्कृतौ शैवाः अपि अन्तर्भवितुमर्हन्ति । शिवपार्वतीसंवादमाध्यमेन रचितेषु शैवतन्त्रग्रन्थेषु प्रमुखदेवत्वेन श्रीजगन्नाथस्य प्रमुखतन्त्रपीठत्वेन पुरुषोत्तमक्षेत्रस्य चोल्लेखौ विद्येते। अधिकन्तु शैवतन्त्रमिति कथिते उत्तरतन्त्रे जगन्नाथस्य माहात्म्यं शिवादत्यधिकमिति प्रतिपादितम् । अस्य तन्त्रस्यानुसारेण षट्रूपेण प्रकाशितः शिवः अन्ततो गत्वा जगन्नाथमेवाश्रयति । तद्यथा-

ब्रह्माविष्णुश्च रुद्रश्च ईश्वरश्च सदाशिवः ।
ततः परः शिवः शम्भोः षट् शिवाः षट् प्रकाशकाः।
क्रियानिविष्टः सर्वत्र भावनाग्रहरूपधृक्।
स पश्यति जगन्नाथं कमलोरुतं हरिम्[२४]।।

शैवमतानुयायिनः जगन्नाथ-बलभद्र-सुभद्रेति मूर्तित्रयं यथाक्रमं शिवः विन्दुः शक्तिश्चेति अथवा पशु-पाश-पतिश्चेति कल्पयन्ति।

(vii) गाणपत्यसंस्कृतिः-

ख्रीष्ट्रीय – सप्तमशतकादारभ्य चतुर्दशतकं यावत् उत्कले गणेशोपासनायाः सूचना प्राप्यते। तेषु गणपतिपीठेषु कटकजिल्लायाः महाविनायकमन्दिरं प्रसिद्धं विद्यते । गणपतेः उपासनायाः प्रतीकरूपेण इदानीमपि प्रत्येकेऽस्मिन् शिवमन्दिरे पार्श्वदेवतारूपेण शिवस्य पार्श्वे एव गणेशस्य पूजनं प्रचलितमस्ति। जगन्नाथमन्दिरे गणेशस्य कृते एकं स्वतन्त्रमन्दिरं वर्तते। १६६४ ख्रीष्टीब्दे गणपतिभट्टः उत्कलमागत्य गाणपत्यसंस्कृतेः प्रचारं कृतवन्तः। गाणपत्यसंस्कृति-प्रभावात् स्नानयात्रासमये स्नानमण्डपे श्रीजगन्नाथः गणपतिवेशं धारयति। गाणपत्याः श्रीजगन्नाथं गणपति इति कल्पयन्ति।

(viii) वैष्णवसंस्कृतिः –

श्रीशङ्कराचार्यः श्रीक्षेत्रमागत्य बौद्धभिक्षुकान् पराजित्य तत्र ब्राह्मण्यधर्मस्य पुनः प्रचलनं चकार । तदा श्रीजगन्नाथसंस्कृतौ वैष्णवधर्मस्य प्राधान्यं जातम्।

ख्रीष्टीयैकादशशताब्द्यामुत्कलेषु गङ्गसाम्रज्यस्य प्रतिष्ठानन्तरं प्राचीना माधवोपासना पुनरुज्जीविता अभवत् । गङ्गवंशीयाः नरपतयः वैष्णवीयचिन्ताधारायाः परिपोषकाः आसन् । तेषां राजत्वकाले जैन-बौद्ध-शैव-शाक्तधर्मधारायाः प्रभावः प्रतिहतः सन् उत्कले माधवरूपिणः जगन्नाथस्य पूजा प्रचलिता । द्वादशशतके रामानुज-निम्बार्क-माध्वाचार्यप्रभृतयः वैष्णवधर्म-प्रचारकाः पुरुषोत्तमक्षेत्रमागत्य श्रीजगन्नाथं वैष्णवधर्मस्य श्रेष्ठदेवत्वेन स्वीकृतवन्तः । गङ्गवंशीयाः नरपतयः सर्वे आत्मानं श्रीजगन्नाथस्य सेवका इति विचार्य

स्वशासनकार्यं परिचालयन्ति स्म इति मादलापाञ्जितःज्ञायते। ते गङ्गवंशीयाः नरपतयः श्रीजगन्नाथस्य सेवापूजायां राजकीयव्यवस्थां कृतवन्तः । तदा श्रीजगन्नाथः भारतवर्षस्य श्रेष्ठैश्वर्यसम्पन्न- देवरूपेणख्यातः सन् 'बडठाकुर' इति संज्ञां लेभे । श्रीमन्दिरस्य सुपरिचालनार्थं ते भूसम्पत्तिव्यवस्थां कृतवन्तः । ततः प्रभृतिः राजकीयाडम्बरेण सह जगन्नाथस्य यात्राः प्रवर्तिताः। अपितु समग्रउत्कलराज्ये वैष्णवधर्मस्य प्रभावः परिलक्षितोऽभूत् । तदानीम् उत्कलगजपतिः राजा प्रतापरुद्रदेवः स्वात्मीयैः सह वैष्णवधर्मं गृहीत्वा श्रीमन्दिरे वैष्णवमतानुसारेण पूजाविधिं प्रारब्धवान्। श्रीचैतन्येन श्रीमन्दिरे राधाकृष्णोपासनायाः प्रचलनमभूत्। वैष्णवमतावलम्बिनः सर्वे जगन्नाथं श्रीकृष्णरूपेण बलभद्रं संकर्षणरूपेण तथा च सुभद्रां राधारूपेण कल्पयन्ति।

इत्थम् ऐतिहासिकगवेषणाजाततथ्यैः ज्ञायते यते श्रीजगन्नाथस्य ऐतिह्ये वहुसंस्कृतीनां समावेशः दृश्यते। श्रीजगन्नाथसम्बन्धीयानि पूर्वालोचनानि विहाय तथ्यान्तराणि अपि प्रचारितानि भवन्ति। ख्रीष्टधर्मानुयायिनोऽपि क्रुशकाष्ठानुकरणेन श्रीजगन्नाथमूर्त्तिः निर्मितेति प्रमाणयन्ति। श्रीजगन्नाथस्याविर्भावविषयादारभ्य तस्य मूर्त्तिनिर्माणनीतिनियमादिप्रसङ्गमधिकृत्य प्रकटीकृतानि इत्थम्भूतानि गवेषणाजाततथ्यानि जनतायाः हृदयानि कथमपि नैव स्पर्शितानि।

श्रीजगन्नाथस्तु भक्तानां कृते इष्टदेवः रक्षकः पालकः मोक्षदाता परब्रह्म च । भक्तजनतायाः एतादृशविश्वासस्य मूले शास्त्रप्रमाणानि अन्तर्निहितानि सन्ति। अतः जगन्नाथस्य ऐतिह्यज्ञानाय शास्त्रीयपर्य्यालोचनं क्रियते।

४- शास्त्रीयपृष्ठभूमिः-

निगमागमपुराणज्योतिषतन्त्रकाव्यादिषु शास्त्रेषु पुरुषोत्तमविष्णोः जगन्नाथरूपेण क्रमविकाशस्य रहस्यं समुपस्थापितं विद्यते। जगन्नाथस्य ऐतिह्यज्ञानाय तेषां शास्त्राणां संक्षिप्तपर्य्यालोचनमत्र विधीयते।

(i) वेदादिषु –

श्रुत्यनुसारेण संसारवृक्षस्य उत्पत्तौ कारणभूतोऽस्ति ब्रह्मबीजः। तस्मादेव विशालस्य ब्रह्माण्डस्य परिप्रकाशः जायते। तद् ब्रह्म विपरीतगुणानां समावेशात् 'अणोरणीयान् महतोमहीयान् च कल्पितम्।' 'सर्वं खल्विदं ब्रह्म' इति छान्दोग्यश्रुत्यनुसारेण[२५] जीवात्मभिः सह सम्बन्धितं तद् ब्रह्म पुरुषसंज्ञां लभते। परमात्मनः कृते च तत् पुरुषोत्तमशब्दितम् । नीराकारत्वेन[२६] साकारत्वमिति उपनिषद्- वचनानुसारेण च निराकारपुरुषोत्तमतत्त्वं वैदिकसाहित्ये विशेषतः ब्राह्मणभागे यज्ञपुरुषः विष्णुः कल्पितः। तच्च तत्त्वं परवर्त्तिसाहित्येषु रामायणे महाभारतादिषु च समुपन्यस्तम्। रामायणे तत्तत्त्वम् इक्ष्वाकुकुलदेवजगन्नाथरूपेणः[२७] प्राकाश्यं गतम्। महाभारते अनुशासनपर्वणि श्रीविष्णुसहस्रनामवर्णनप्रसंगे[२८] पुरुषोत्तमजगन्नाथयोश्च मध्ये अभेदः प्रतिपादितः। इत्थम् ऋग्वेदे[२९] शक्लयजुर्वेदीयपुरुषसूक्ते[३०] च प्रतिपादितः सहस्रशीर्षापुरुषः क्रमशः आख्यानोपाख्यानगाथामाध्यमेन पुराणेषु पुरुषोत्तमविष्णु –नीलमाधव-जगन्नाथरूपेण च रूपान्तरं गृहीतवान् ।

(ii) पुराणेषु–

पुराणेषु विशेषतः स्कन्दपुराणे (७००-१३००) ब्रह्मपुराणे (६००-१४००) पद्मपुराणे(६५०-१४००) नारदीयपुराणे (७००-९००) पुरुषोत्तमजगन्नाथस्य तत्त्वं सम्पूर्णतया उन्मीलितं वर्तते।

१. **स्कन्दपुराणम् –**

स्कन्दपुराणस्य वैष्णवखण्डस्योत्कलखण्डे पूर्याः जगन्नाथमन्दिर-पूजाविधिप्रतिष्ठातत्सम्बधिनामाख्यानानां संग्रहः तथा नारदोपदेशेन इन्द्रद्युम्नद्वारा दारुब्रह्मणः श्रीजगन्नाथस्यनिर्माणविषयकं विस्तृतवर्णनं समुपलभ्यते । पुरुषोत्तमक्षेत्रस्य तथा श्रीजगन्नाथदेवस्य ऐतिह्यज्ञानाय खण्डोऽयमत्यन्तमुपयोगी वर्त्तते।

श्रीस्कन्दपुराणस्य उत्कलखण्डः पुरुषोत्तमतत्त्वप्रतिपादने प्रमाणभूतोऽस्ति।जगन्नाथपुर्य्याः प्राचीनेतिहासवर्णनं खण्डस्यास्य वैशिष्ट्यमभिव्यनक्ति । श्रीस्कन्दमहापुराणे वैष्णवखण्डे पुरुषोत्तम-क्षेत्रमाहात्म्ये भगवतः जगन्नाथस्य सम्पूर्णं स्वरूपं पूजाविधानं यात्राविधिकथनं तथाच पुरुषोत्तमक्षेत्रस्यापि सम्पूर्णं विवरणं प्रकाशितं विद्यते । उत्कलदेशस्थितानां तीर्थानामपि विवरणमत्रैव प्रकाशितम्। जगन्नाथस्य स्वरूपविषये श्रीस्कन्दपुराणे स्पष्टं चित्रं प्राप्यते।तत्र जगन्नाथः दारुमयब्रह्मविग्रह इति अभिहितः-

एवं दयाम्बुधिरसौ तस्मिन्नीलाचले वसन् ।
दीनानाथानुग्रहाय दारुव्याजशरीरवान् ।।
न हि काष्ठमयी मोक्षं ददाति प्रतिमा क्वचित् ।
आकृतेह्यपवर्गस्तु कृताद् वा दारुणः कथम् ।। (२बै.ख.उ.ख.४५/१६)

स्कन्दपुराणे उत्कलखण्डे श्रीजगन्नाथः स्वयं ब्रह्मेति निरूपितः -

पुरुषोत्तमाख्यं सुमहत्क्षेत्रं परमपावनम् ।
यत्राऽऽस्ते दारवतनुः श्रीशो मानुषलीलया ।
दर्शनान्मुक्तिदः साक्षात्सर्वतीर्थफलप्रदः ।। (२ वै. ख, उ.ख.१/२-३)

न केवलं जगन्नाथस्य तस्य क्षेत्रस्यापि महन्महत्त्वं पुराणेऽस्मिन् प्रतिपादितम्।वैदिकं पुरुषतत्त्वं स्कन्दपुराणे पुरुषोत्तमजगन्नाथरूपेण पल्लवितं पुष्पितं पूर्णरूपेण विकशितञ्चास्ति।

२) ब्रह्मपुराणे श्रीजगन्नाथः -

आद्यं सर्वपुराणानां पुराणं ब्रह्ममुच्यते ।
अष्टादशपुराणानि पुराणज्ञाः प्रचक्षते ।

जगन्नाथतत्त्वपरिपूर्णेऽस्मिन् सुप्राचीने पुराणे जगन्नाथतत्त्वनिरूपणे बहूनि रोचकानि नवीनानि च तथ्यानि सम्मुखमायान्ति येषां पठनेन मनसि जगन्नाथतत्त्वस्य तथा तस्य ऐतिह्यस्य च वास्तविकतायाः ज्ञानं जायते ।जगन्नाथस्वरूपनिरूपणप्रसङ्गे पुराणेऽस्मिन् वर्णितं यत् तस्मिन् क्षेत्रवरे पुण्ये श्रीपुरुषोत्तमे बहुप्राचीनकालात् श्रेष्ठा इन्द्रनीलमयी सार्वकामिकी प्रतिमा पूजिता भवति स्म । तां दृष्ट्वा मानवाः मोक्षं प्राप्नुवन्ति । अनेन स्वकीयं व्यापारनाशं विज्ञाय वैवश्वतः यमः भगवन्तं सर्वं निवेदयामास । तद् निशम्य स भगवान् सिकताभिः आत्मनः प्रतिमां गोपयामास ।

परमवैष्णवः इन्द्रद्युम्नः नीलमाधवदर्शनार्थं क्षेत्रं प्रति आगत्य प्रतिमायाः अदर्शनविषयं ज्ञात्वा तत्र जगत्पतेः विष्णोः आराधनार्थमुपायमचिन्तयत् । तदर्थं प्राथम्येन प्रासादनिर्माणार्थं तेन प्रयासः विहितः । प्रासादनिर्माणार्थमिन्द्रद्युम्नस्य राज्ञामाह्वानं पुराणस्यास्य निजस्वं वैशिष्ट्यमभिव्यनक्ति । राज्ञः प्रेरयित्वा तेनोक्तम्-

गच्छध्वं सहिताः सर्वे शिलार्थे सुसमाहिताः
गृहीत्वा शिल्पिमुख्यांश्च शिल्पकर्म विशारदान्
विन्ध्याचलं सुविस्तीर्णं बहुकन्दरशोभितम्
निरूप्य सर्वसानूनि छेदयित्वा शिलाः शुभाः ।।
संवाह्यन्तां च शकटैर्नौकाभिर्मा विलम्बथ । (- ब्र.पु.४७/८-६)

इन्द्रद्युम्नेनाहूताः भूपाः तथैव चक्रुः, धनरत्नैश्च ववृषुः इति ब्रह्मपुराणस्याभिमतम् ।
अस्मात् ज्ञायते यत् विन्ध्याचलशिलाभिः प्रासादनिर्माण-कार्यमभूत् । तथाच प्रासादनिर्माणकार्यं प्रागेव जातमनन्तरञ्चप्रतिमोत्पत्तिः जाता।

३) पद्मपुराणे श्रीजगन्नाथः -

विष्णुतत्त्वसम्बलितेऽस्मिन् पुराणे श्रीजगन्नाथस्य सम्पूर्णं स्वरूपं तत्त्वञ्च निरूपिते विद्येते । पद्मपुराणानुसारेण जगन्नाथः स्वयं पुरुषोत्तमः विष्णुः। पुराणेऽस्मिन् पातालखण्डे यद्यपि जगन्नाथ-बलभद्र-सुभद्रा-सुदर्शनानां नामोल्लेखः न विद्यते तथापि खण्डेऽस्मिन् भगवतः पुरुषोत्तमस्य तथाच तस्य क्षेत्रस्य महन्महत्त्वं प्रतिपादितम् ।

सुमति-शत्रुघ्नयो: संवादमाध्यमेन पुराणेऽस्मिन् पुरुषोत्तमदर्शनेन काञ्चीनरेशस्य रत्नग्रीवस्य मोक्षप्राप्तिवृत्तं वर्णितं विद्यते , यत् प्राचीनकाले काञ्चीप्रान्ते रत्नग्रीवनामक: परमोदार: प्रजावत्सल: नरपति: धर्मेण प्रजा:पालयतिस्म । कालान्तरे तस्य मनसि मोक्षप्राप्तिकामना जज्ञे ।रात्रौ स्वप्ने स कमऽपि जटिलब्रह्मणं ददर्श। तादृशमेकं ब्रह्मणं प्रभाते राजसभामध्येविलोक्य स राजा चकितो बभूव।तस्य पुजनं कृत्वा स्वाभिलाषप्राप्तये ब्राह्मणं च पप्रच्छ-

को देवो गर्भनाशाय किं तीर्थञ्च क्षमं भवेत् ।
त्वद्दर्शनान्मेद्यगतं देहस्य पातकम् ।।

तदा ब्रह्मणेनोक्तम्-

सेव्य: श्रीरामचन्द्रोऽसौ संसारज्वरनाशक: ।
पूज्य: स एव भगवान्पुरुषोत्तमसज्ञक: ।।

जटिलब्रह्मणमुखात् पुरुषोत्तमक्षेत्रे नीलपर्वते विराजितस्य परब्रह्मण: महत्त्वं नैवेद्यभक्षणस्य महत्त्वञ्च विज्ञाय स राजा पुरुषोत्तमक्षेत्रं गन्तुमुद्यतोऽभूत् । तत्र गन्तुं स्वबान्धवान् चादिश्य तेनोक्तं यत्-

गच्छन्तु त्वरितालोका: राज्ञा सह महागिरिम् ।
दृश्यतां पापसंहारीपुरुषोत्तमनामधृक् ।।
क्रियतां सर्वसंसारसागरो गोष्पदं पुन: ।
भूष्यतां शङ्खचक्रादिचिन्है: स्व स्व तनुर्नरै: ।। (-प.पु.पा.ख. २९/४४,४५

अनन्तरं काञ्चीनरेश: सकुटुम्ब: सामात्यपरिजन: तीर्थयात्रायां पुरुषोत्तमक्षेत्रं प्रति आयाति । गण्डकीनद्यां स्नात्वा तर्पयित्वा तत: गङ्गासागर-सङ्गमे स्नानं करोति । तत्रैव जटिल: नीलपर्वतं द्रष्टुम् उद्यमं करोति । परन्तु नीलपर्वत: तेन न दृष्ट: । नीलपर्वतं भगवन्तं पुरुषोत्तमञ्च न दृष्ट्वा अतीव शोकाविष्ट: स राजा जटिलब्राह्मणं नीलपर्वतस्यावस्थितिं पृच्छति । परन्तु कण्टकदुर्गमे तत्स्थले नीलपर्वतस्य स्थितिं ज्ञातुं सोऽपि ब्राह्मण: समर्थो नैव भवति । तदनन्तरं पुराणेऽस्मिन् रत्नग्रीवस्य भूपते: स्वप्ने नीलपर्वतदर्शनं वर्णितम्। भूपते: परया भक्त्या तुष्ट: भगवान् पुरुषोत्तम: नीलपर्वतेन सह तत्रैव चात्मानं प्रकटयामास । तस्य दशनेन नैवेद्यभक्षणेन च रत्नग्रीव: परं मोक्षमवाप ।

पद्मपुराणस्य क्रियायोगसारखण्डेऽपि जगन्नाथतत्त्वं वर्णितं विद्यते । खण्डेऽस्मिन् जगन्नाथ-बलभद्र-सुभद्रा-चेतासां देवतानां नामोल्लेखो विद्यते । पुरुषोत्तमक्षेत्रस्याप्युल्लेख: तत्रैव प्राप्यते । अन्येषां क्षेत्रस्थितानां तीर्थानां यात्राणाञ्च वर्णनं तत्र प्रदत्तम् । गुण्डिचायात्राया: महत्त्वपूर्णं वर्णनं तत्रैव वर्तते । रथयात्राया: महत्त्वं तत्र यथाचोक्तं –

गुण्डिचामण्डपस्थं च कृष्णं पश्यति य: पुमान् ।
बलभद्रं सुभद्रां च स याति परमं पदम् ।। -क्रि.यो.सा.ख.१३/४४

इत्थं पद्मपुराणस्य क्रियायोगसारखण्ड: त्रिमुर्त्तेः पुरुषोत्तमजगन्नाथस्य ऐतिह्यस्वरूपं तत्त्वञ्च स्पष्टमुद्घोषयति ।

४) नारदीयपुराणे श्रीजगन्नाथ: -

वैष्णवमतसम्बलिते नारदीयपुराणे उत्तरखण्डे ५२ अध्यायात् ६१ अध्यायं यावत् जगन्नाथतत्त्वं तथा च तस्य ऐतिह्यस्वरूपं चं प्रतिपादितम् । पुराणेऽस्मिन् उत्तरखण्डस्य ५२ अध्याये दक्षिणसमुद्रस्य तीरे उत्कलदेशे पुरुषोत्तमे सुभद्रा-बलभद्र-कृष्णञ्चाराध्य इन्द्रद्युम्ननृपते: परमपदप्राप्तिवृत्तान्तं वर्णितम् । ५३ अध्याये अश्वमेधयज्ञावसरे इन्द्रद्युम्नकृता भगवत्-स्तुति: वर्णिता । ५४ अध्याये नरपते: स्तवेनसन्तुष्टस्य भगवत: स्वप्ने इन्द्रद्युम्नकृते आश्वासनावाक्यै: प्रवोधनं तथाच सिन्धुकूलाश्रितं वृक्षमुत्पाट्य तेन दारुणा मूर्त्तिनिर्माणार्थमाज्ञाप्रदानञ्चोपस्थापिते पुराणमुनिना । तत: प्रभाते भगवत: निर्देशानुसारेण राजा समुद्रतीरं प्रति गत्वा वृक्षमुत्पाट्य तत्र विष्णुं विश्वकर्माणं च साक्षात्कृत्य भगवत: निर्देशेन देवतानां मूर्त्तिं निर्माय शुभे मुहूर्त्ते च प्रतिष्ठां चकार । अनन्तरं पुराणेऽस्मिन् भगवत: दर्शनेन नृपते: मोक्षप्राप्तिवृत्तान्तश्च प्रवर्णितो विद्यते। ५५ अध्याये ज्येष्ठशुक्लैकादश्यां पुरुषोत्तमक्षेत्रगमनं तत्र मार्कण्डेयह्रदे शिवं प्रणस्य अनन्तरं वटवृक्षं परिक्रम्य

पुरुषोत्तम-दर्शनं तत्र नृसिंहस्याराधनञ्चेते विषया: वर्णिता: विद्यन्ते । ५६ अध्याये अनन्तमत्स्यमाधवदर्शनमाहात्म्यं तथा ज्येष्ठा-नक्षत्रे समुद्रे स्नानयोगविधानञ्च प्रदत्तम् । ५७ अध्याये समुद्रतटे मङ्गलाचरणपूर्वकं मङ्गलघटमध्ये भगवत्पूजनविधानं प्रवर्णितमस्ति । ५८ अध्याये पुरुषोत्तमक्षेत्रे समुद्रे स्नान-दान-पितृश्राद्धस्य फलञ्च निरूपितं विद्यते । अध्यायेऽस्मिन् गोलोके राधाकृष्णयोश्च तत्त्वं प्रकाशितम् । ६० अध्याये ज्येष्ठशुक्लदशमीत: पूर्णिमां यावत् राम-सुभद्रा-कृष्णञ्चावलोक्य महायात्राफलं लभेदिति प्रतिपादितम् । ६१ अध्याये पुरुषोत्तमक्षेत्रमाहात्म्यं तथा च जगन्नाथतत्त्वं ऐतिह्यस्वरूपञ्च प्रतिपादितम् ।

५- उपसंहार:-

भारतीयवाङ्गमयस्यानुशीलनेन वैदिकं पुरुषतत्वं पुरुषोत्तमजगन्नाथरूपेण सम्मुखमायाति । तन्त्रशास्त्रादारभ्य पुराणं यावत् सर्वत्र जगन्नाथतत्त्वं ऐतिह्यस्वरूपं चं स्पष्टतया प्रतिपादितम्
रुद्रयामल-तन्त्रमालादिषु ग्रन्थेषु च श्रीजगन्नाथस्य चर्चा विस्तरत: विद्यते । तन्त्रशास्त्रे जगन्नाथ: भैरवत्वेनाभिहित: । तद्यथा रुद्रयामले -

महाकन्दवासी महानन्दवासी पुरग्रामवासी महापीठदेशा
जगन्नाथवक्षस्थलस्थ: वरेण्य: कृत नन्दकर्त्ता शिवानन्दवर्ती ।।

तन्त्रयामले च -

भारते चोत्कले देशे भूस्वर्गे पुरुषोत्तमे ।
दारुरूपी जगन्नाथ: भक्तानामभयप्रद: ।।

नैषधीयचरित-प्रबोधचन्द्रोदय-वेणीसंहार-अनर्घराघवादिषु च श्रीजगन्नाथ: पुरुषोत्तमत्वेन स्वीकृत:। संस्कृतकाव्येषु नाटकेषु च श्रीजगन्नाथस्य भगवत्त्वं सुस्वीकृतम् । कविशेखर: श्रीजयदेव: श्रीजगन्नाथस्य महान् भक्त: आसीत् । श्रीकृष्णरूपिणं जगन्नाथं नायकत्वेन स्वीकृत्य गीतगोविन्दनामकं सुमहत् गीतीकाव्यं तेन विरचितम् । श्रीगीतगोविन्दे दशावतारवर्णने 'जगदीश" पदं जगन्नाथमेव सङ्केतयति ।

कपिलसंहिता-शून्यसंहिता-वामदेवसंहितादिषु संहिताग्रन्थेषु नीलाद्रिमहोदयादिषु च ग्रन्थेषु जगन्नाथतत्त्वं ऐतिह्यस्वरूपं च भूरिश: प्रतिपादितम् । गरुड-कूर्म-मत्स्य-वामन-अग्नि-विष्णु-नीलमतपुराणेषु जगन्नाथतत्त्वं पुरुषोत्तमक्षेत्रयात्राफलञ्च संक्षिप्तरूपेण प्रकाशितमस्ति । ब्रह्म-पद्म-स्कन्द-नारदीय-कपिलादिषु पुराणेषु जगन्नाथतत्त्वं पूर्णतया निरूपितम् । इत्थंभारतीयवाङ्गमये पुरुषोत्तमजगन्नाथस्य ऐतिह्यस्वरूपं तत्त्वञ्च स्पष्टतया समुपलभ्यते इति शम्।

सहायकग्रन्थसूची –

1. मन्दिरेर कथा गुरुदास सरकार
2. ओडिआ साहित्यर इतिहास
3. जगन्नाथचेतनार उद्भव ओ विकास डॉ. वासुदेव साहु
4. जगणाह जगन्नाथ अभिधान राजेन्द्रस्य चतुर्थ भागे
5. इन्द्रद्युम्नकिम्बदन्तिर ऐतिहासिकता भञ्जप्रदीप आश्विन १३४२
6. Antiquities of Orissa Vol -2 page- 136 R.L Mishra
7. The Indian Empire Sir H.H.Hunter
8. Indian architecture Ferguson
9. जगणाह-जगन्नाथ-अभिदानराजेन्द्रस्य चतुर्थभागे – पृ. १८।
10. ओडिशार जैनधर्म- ग्रन्थप्रवेश, पृ. ७
11. Antiquities of Odisha – vol-ii, p. 136. R.L. Mishra
12. क. The Indian Empire – Sir H.H. Hunter.
13. ख. Indian Architecture – Ferguson.

14. देउलभितरे सिंहासने विजे हेइ। बउद्धरूपरे प्रभु शङ्खचक्र बहि।। शारमादासकृते महाभारते से जगन्नाथ ये संसार उद्धारण । म्लेच्छजन उद्धारण से बउद्धरूपेण ।। तत्रैव- आदिपर्व, पृ. १०५
15. The Lord of Vishnu , p. 64
16. Viashnavism in Orissa , p. 18
17. उड्डीयान पूर्णगिरि जालन्धरस्तथैव च । कामरूपं इति ख्यातः कौलपीठचतुष्टयम्।।
18. सृष्टिभूता महाशक्तिर्मणिपुरनिवासिनी। विमला सा पराशक्तिरुड्डीयानपुरेश्वरी।।
19. उत्कले नाभिदेशे च विमला पुरुषोत्तमे। विमला भैरवी यत्र जगन्नाथस्तु भैरवः।। श्रीमद्देवीभागवते।
20. उत्तरतन्त्रे, ४५.११-१२
21. छान्दोग्यश्रुतिः
22. कैवल्योपनिषदि द्वितीयखण्डे, मन्त्रः – २।
23. आराधय जगन्नाथं ईक्ष्वाकुकुलदैवतम्। आराधनीयमनिशं देवैरपि सवासवैः।। (रामायण उत्तरकाण्डे – १०८.१८)
24. जगत्प्रभुं देवदेवमनन्तपुरुषोत्तमम्। तस्य लोकप्रधानस्य जगन्नाथस्य भूपतेः ।। अव्ययपुरुषसाक्षी क्षेत्रज्ञोऽक्षर एव च। योगे योगविदां नेता प्रधानपुरुषेश्वरः।। न्नारसिंहवपुः श्रीमान् केशवः पुरुषोत्तमः।।
25. ऋग्वेदे, १०.१२.१५५.३, सायणभाष्ये, पृ. ८४१
26. शुक्लयजुर्वेद पुरुषसूक्त – १- २, ५
27. आदौ यद्दारु प्लवने सिन्धोः पारे अपुरुषम् । तदालभस्व दुर्दनो तेन गच्छ परस्तरम् ।। अथर्ववेद – श्रीपुरुषोत्तमत्वे, पृ. १-२।
28. Orissa State Museum Manuscript No. – 19-20
29. श्रीजगन्नाथ चरित्रामृते – सप्तदशाध्याये, पृ. २२१
30. Descriptiv Catalouge of Sanskrit Manucript. Vol-1 p. 78
31. Ibid , Vol-vii, p. 81
32. भगवल्लीलाचिन्तामणि, D. C.S. MSS, VPI-VI , P. 187
33. शतानन्दरत्नमाला, D. C.S. MSS, VPI-VI , P. XXV
34. नीलाद्रिनाथं जगतामधीशं चिदंशरूपं शरणैकनाथं श्रीनीलगोत्राधिपतिं परेशं शुरेन्द्रवद्यं प्रणतोऽस्मि नित्यम् ।। (वा.सं. , १.१)
35. तत्रैव ।
36. वामदेवसंहिता, १.४-५
37. वामदेवसंहिता,६.११
38. वामदेवसंहिता,८.२६

अध्यक्षा
पुराणेतिहासविभागः
श्रीसदाशिवपरिसरः, पुरी